**ज्ञानयज्ञ** पु॰ ज्ञानं यज्ञ इवास्य। तत्त्वज्ञे। "ब्रह्माग्नावपरे यज्ञं यज्ञेनैवोपजुह्वति" इति वाक्येन तत्त्वज्ञानस्य यज्ञरूपत्वमुक्तम्। अस्यार्थः। अपरे कर्मयोगिनो विलक्षणा संन्यासिनः ब्रह्म तत्पदार्थः अग्निरिव होमाधारत्वात् तस्मिन् यज्ञं प्रत्यगात्मानं त्वंपदार्थं यज्ञेनात्मनैव उपजुह्वति त्वंपदार्थाभेदेनैव तत्स्वरूपतया पश्यन्तीत्यर्थः। "महापापवतां नृणां ज्ञानयज्ञो न रोचते। प्रत्युत ज्ञानयज्ञे तु प्रद्वेषो जायते स्वतः" शब्दार्थचि॰ धृतवाक्यम्।

**ज्ञानयोग** पु॰युज्यते ब्रह्मणाऽनेन युज–करणे घञ् ज्ञानमेव योगः। ब्रह्मप्राप्तिसाधने ज्ञानार्थनिष्ठाभेदे। "लोकेऽस्मिन् द्विविधा निष्ठा पुरा प्रोक्ता मयाऽनघ!। ज्ञानयोगेन सांख्यानां कर्मयोगेन योगिनाम्" गीता।

**ज्ञानलक्षणा** स्त्री ज्ञानं ज्ञानभेदो लक्षणं स्वरूपं यस्याः। न्यायमते अलौकिकप्रत्यक्षसाधने सन्निकर्षभेदे उपनयशब्दे १२१५ पृ॰ विवृतिः। मथुरानाथेन तु अन्यथैव सामान्यलक्षणाज्ञानलक्षणयोर्भेदो दर्शितः यथा

"न च सामान्यप्रकारकज्ञानस्यैव सामान्यलक्षणात्वे ज्ञानलक्षणासामान्यलक्षणयोः कार्य्यकारणभावे को भेदः इति वाच्यं कारणतावच्छेदकभेदेन कार्य्यतावच्छेदकभेदेन च भेदात्। सामान्यलक्षणायाः कार्य्यकारणभावस्तु तत्तत्सम्बन्धावच्छिन्नघटत्वादिप्रकारिताशालिज्ञानत्वेन, स्वरूपतस्तत्सम्बन्धावच्छिन्नघटत्वादिप्रकारिताकतत्तत्सम्बन्धावच्छिन्नघटत्वाद्याश्रयताशालिमुख्यविशेष्यकप्रत्यक्षत्वेन, यावत्त्वस्य कार्य्यतावच्छेदकावटकत्वेऽपि विनिगमनाविरहेण सकलघटभानम्। समवायसम्बन्धेन घटत्वप्रकारकज्ञानानन्तरं कालिकादिसम्बन्धेन घटत्वादिप्रकारकनिखिलघटविषयकप्रत्यक्षस्य समवायसम्बन्धेन घटत्वप्रकारेण घटत्ववतः कालादेः प्रत्यक्षस्य च वारणाय सम्बन्धान्तर्भावः। घटत्वादिप्रकारकज्ञानं विनापि द्रव्यत्वादिसामान्यलक्षणया जायमाने द्रव्यत्वादिप्रकारक घटादिमुख्यविशेष्यकप्रत्यक्षे व्यभिचारवारणाय कार्य्यतावच्छेदके घटत्वादिप्रकारिताकेति। प्रकारित्वञ्चालौकिकं ग्राह्यं तेन घटत्वादिप्रकारकज्ञानं विनापि द्रव्यत्वादिविशिष्टबुद्ध्यात्मकघटत्वादिनिर्विकल्पकोत्तरं द्रव्यत्व सामान्यलक्षणया जायमाने यावद्घटविशेष्यकप्रत्यक्षेऽलौकिकसन्निकर्षमर्य्यादया घटत्वप्रकारके न व्यभिचारः। न च तथापि कालिकादिसम्बन्धेन स्वरूपतो घटत्वादिप्रकारकबुद्ध्यात्मकगवादिविशेष्यकसमवायसंसर्गकद्रव्यत्वप्रकारकस्मरणोत्तरं द्रव्यत्वसामान्यलक्षणया जायमाने यावद्घटमुख्यविशेष्यकप्रत्यक्षे उपनयमर्य्यादया समवायसम्बन्धेन स्वरूपतो घटत्वप्रकारके व्यभिचार इति वाच्यम्। यथोक्तकार्य्यकारणभावस्यैव बाधकत्वेन तत्र समवायसम्बन्धेन घटत्वस्याप्रकारत्वात्। घटत्वप्रकारकज्ञानं विनाऽपि जातित्वरूपेण गोत्वादिजात्यन्तरप्रकारकज्ञानाद् जायमाने जातिस्वरूपेण घटत्वादिनिखिलजातिप्रकारकनिखिलजात्याश्रयप्रत्यक्षे व्यभिचारवारणाय स्वरूपत इति घटत्वादिप्रकारितानाविशेषणं, यथोक्तकार्यकारणभावस्यैव बाधकत्वेन तत्र कथञ्चिदपि स्वरूपतो घटत्वादेरप्रकारत्वात्। कालिकसम्बन्धेन स्वरूपतो घटत्वादिप्रकारकस्मरणादितो जायमाने विशेष्ये विशेषणमिति रीत्या समवायसम्बन्धेन घटादिप्रकारकघटवदित्याद्युपनीतभाने व्यभिचारवारणाय मुख्यविशेष्यत्वप्रवेशः। उपनीतभाने च घटो न मुख्यविशेष्यः बहिरिन्द्रियस्थले उपनीतं विशेषणतया भासते इति नियमात्। मुख्यविशेष्यत्वमप्यलौकिकं ग्राह्यं तेन कालिकसम्बन्धेन स्वरूपतो घटत्वादिस्मरणलौकिकसन्निकर्षाभ्यां जायमाने लौकिकालौकिकोभयघटत्वप्रकारिताशाल्ययं घट इति घटमुख्यविशेष्यकलौकिकप्रत्यक्षे न व्यभिचारः। अथ तथापि कालिकसम्बन्धेन स्वरूपतो घटत्वप्रकारकस्मरणाज्जायमाने समवायसम्बन्धेन घटत्वप्रकारकमुख्यविशेष्यकमानसोपनीतभाने व्यभिचारो मानसोपनीतं विशेषणतयैव भासत इति नियमाभावात् तत्र कालिकसम्बन्धेन घटत्वप्रकारेण प्रत्यक्षं न तु समवायसम्बन्धेन घटत्वप्रकारकमित्युक्तावपि घटवदिति घटादिस्मरणोत्तरं जायमाने परम्परासम्बन्धेन घटत्वप्रकारकमानसोपनीतभाने व्यभिचारो दुर्वारः तदनभ्युपगमे तादृशस्मरणोत्तरं निखिलघटाश्रयसाक्षात्कारानुपपत्तेः द्रव्यत्वप्रकारकज्ञानस्याऽप्रत्यासत्तित्वात् इति चेन्न लाघवात् यथोक्तरूपेण कार्यकारणभावकल्पने यथोक्तमानसे घटादिर्न मुख्यविशेष्यः किन्तु चक्रव्यूहवत् घटत्वपुटितो भवन्नेव भासत इत्येव कल्प्यते यथोक्तकार्य्यकारणभावस्यैव बाधकत्वात् तत्तदुपनीतभानान्यत्वप्रवेशे गौरवात् सर्वत्रैव मानसोपनीतभाने उपनीतं अवश्यं मुख्यविशेष्यतया भासते इति नियमाभावात्। असति बाधक एव मानसोपनीतस्य प्रकारत्वविशेष्यत्वलक्षणद्विविधविषयत्वाभ्युपगमात्। एवं स्वरूपो दण्डपुरुषोभयविषयकसमूहालम्बनस्मरणानन्तरं जा-